# আঞ্জনেয গাযত্রি , ধ্যানং , ত্রিকাল বংদনং

{॥ আঞ্জনেয গাযত্রি , ধ্যানং , ত্রিকাল বংদনং ॥}

শ্রী আঞ্জনেয স্বামী পরদেবতাভ্যো নমঃ

ধ্যানম্

উদ্যদাদিত্য সংকাশং উদার ভুজ বিক্রমম্ ।

কন্দর্প কোটি লাবণ্যং সর্ব বিদ্যা বিশারদম্ ॥

শ্রী রাম হৃদযানংদং ভক্ত কল্প মহীরুহম্ ।

অভযং বরদং দোর্ভ্যাং কলযে মারুতাত্মজম্ ॥

অঞ্জনানন্দনং বীরং জানকী শোকনাশনম্ ।

কপীশং অক্ষহন্তারং বন্দে লংকা ভযংকরম্ ॥

আঞ্জনেযং অতিপাটলাননং কঞ্চনাদ্রি কমনীয বিগ্রহম্ ।

পারিজাত তরুমূল বাসিনং ভাবযামি পবমান নন্দনম্ ॥

উল্লংঘ্য সিন্ধোঃ সলিলং সলীলং যশ্শোক বহ্নিং জনকাত্মজায ।

আদায তেনৈব দদাহ লংকাং নমামি তং প্রান্জলিরাঞ্জনেযং ॥

অতুলিত বলধামং স্বর্ণশৈলাভদেহম্

দনুজবন কৃশানং জ্ঞানিনাং অগ্রগণ্যম্ ।

সকল গুণ নিধানং বানরাণাং অধীশম্

রঘুপতি প্রিয ভক্তং বাত জাতং নমামি ॥

গোষ্পদীকৃত বারশিং মশকীকৃত রাক্ষসাম্ ।

রামাযণ মহামালা রত্নং বন্দে অনিলাত্মজম্ ॥

যত্র যত্র রঘুনাথ কীর্তনং তত্র তত্র কৃত মস্তকাঞ্জলিম্ ।

ভাষ্পবারি পরিপূর্ণ লোচনং মারুতিং নমত রাক্ষসান্তকম্ ॥

অমিষীকৃত মার্তংদং গোষ্পদীকৃত সাগরম্ ।

তৃণীকৃত দশগ্রীবং আঞ্জনেযং নমাম্যহম্ ॥

মনোজবং মারুত তুল্য বেগং

জিতেন্দ্রিযং বুদ্ধিমতাং বরিষ্ঠম্ ।

বাতাত্মজং বানর যূথ মুখ্যং

শ্রী রামদূতং শিরসা নমামি ॥

আঞ্জনেয গাযত্রি

ওঁ আঞ্জনেযায বিদ্মহে বাযুপুত্রায ধীমহি ।

তন্নো হনুমত্ প্রচোদযাত্ ॥

Meaning: I wish to know the son of a~njani.

I meditate on vAyu putra.

May that hanumAn propel us.

আঞ্জনেয ত্রিকাল বংদনং

প্রাতঃ স্মরামি হনুমন্ অনন্তবীর্যং

শ্রী রামচন্দ্র চরণাম্বুজ চংচরীকম্ ।

লংকাপুরীদহন নন্দিতদেববৃন্দং

সর্বার্থসিদ্ধিসদনং প্রথিতপ্রভাবম্ ॥

Meaning: I remember that hanuman during

the early hours as one whose valor is

immeasurable. I remember that bee who

stays always at shrI ramachandra's

feet. I remember HIM who burnt la.nka

and made gods happy. I remember him

who is the store house of all siddhis

and who is capable of anything.

}

মাধ্যম্ নমামি বৃজিনার্ণব তারণৈকাধারং

শরণ্য মুদিতানুপম প্রভাবম্ ।

সীতাধি সিংধু পরিশোষণ কর্ম দক্ষং

বংদারু কল্পতরুং অব্যযং আঞ্জনেযম্ ॥

Meaning: I bow that Anjaneya svAmi during

the mid day as the one capable Person

to crossing the ocean, who blesses the

person with enormous happiness when

he/she takes refuge in HIM. He is

entrusted with the responsibility of

annihilating sIta's sorrows. He is like

a wish-fulfilling tree for one who bows to HIM.

}

সাযং ভজামি শরণোপ স্মৃতাখিলার্তি

পুঞ্জ প্রণাশন বিধৌ প্রথিত প্রতাপম্ ।

অক্ষাংতকং সকল রাক্ষস বংশ

ধূম কেতুং প্রমোদিত বিদেহ সুতং দযালুম্ ॥

Meaning: I worship that A~njaneya svAmi

during the evening as the one who saves

everyone who takes HIS name. He the most

valorous one, who killed akShA and was

the dhUmaketu for all the demons.

He also made sIta devi (daughter of

videha country) happy.

}

-------

Ravisankar S. Mayavaram

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Anjaneya Gayatri , Dhyanam & Trikala Vandanam Lyrics in Bengali PDF
% File name : anjaneya.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Latest update : October 12, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website